# Shri Bhuvaneshwari Sahasranamastotram

# શ્રીભુવનેશ્વરીસહસ્રનામસ્તોત્રમ્

## Document Information

Text title : Bhuvaneshvari Sahasranama Stotra

File name : bhuvaneshvarIsahasranAmastotra.itx

Category : sahasranAma, devii, dashamahAvidyA, devI

Location : doc_devii

Transliterated by : DPD, Alex

Proofread by : DPD, NA

Description-comments : Rudrayamalatantra

Source : Bhuvaneshwari Stava Manjari, Ramdatt Shukla, and BhuvaneshvarI varivasyA

Latest update : October 11, 2014, July 29, 2018

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

September 17, 2023

*sanskritdocuments.org*

# શ્રીભુવનેશ્વરીસહસ્રનામસ્તોત્રમ્

(અપૂર્ણસહસ્રનામકમિદમ્ । સહસ્રશબ્દો બહ્વર્થકોઽપિ ।
યાવલબ્ધં તસ્ય પઠનેનાપિ પૂર્ણમ્ ફલમિતિ વૃદ્ધાઃ ।)
શ્રીગણેશાય નમઃ ।

શ્રીદેવ્યુવાચ - શ્રીપાર્વત્યુવાચ -
દેવ દેવ મહાદેવ સર્વશાસ્ત્રવિશારદ ! ।
કપાલખટ્વાઙ્ગધર ! ચિતાભસ્માનુલેપન ! ॥ ૧॥

યા આદ્યા પ્રકૃતિર્નિત્યા સર્વશાસ્ત્રેષુ ગોપિતા ।
તસ્યાઃ શ્રીભુવનેશ્વર્યા નામ્નાં પુણ્યં સહસ્રકમ્ ॥ ૨॥

કથયસ્વ મહાદેવ ! યથા દેવી પ્રસીદતિ ।

ઈશ્વર ઉવાચ - શ્રીમહેશ્વર ઉવાચ -
સાધુ પૃષ્ટં મહાદેવિ ! સાધકાનાં હિતાય વૈ ॥ ૩॥ સાધુ લોકહિતાય ચ

યા આદ્યા પ્રકૃતિર્નિત્યા સર્વશાસ્ત્રેષુ ગોપિતા ।
યસ્યાઃ સ્મરણમાત્રેણ સર્વપાપૈઃ પ્રમુચ્યતે ॥ ૪॥

આરાધનાદ્ભવેદ્યસ્યા જીવન્મુક્તો ન સંશયઃ ।
તસ્યા નામસહસ્રં વૈ કથયામિ સમાસતઃ ॥ ૫॥
var તસ્યા નામસહસ્રાણિ કથયામિ શ્રુણુષ્વ તત્

વિનિયોગઃ -
અસ્ય શ્રીભુવનેશ્વર્યા સહસ્રનામસ્તોત્રસ્ય દક્ષિણામૂર્તિઋષિઃ,
પઙ્ક્તિશ્છન્દઃ, આદ્યા શ્રીભુવનેશ્વરીદેવતા, હ્રીં બીજં,
શ્રીં શક્તિઃ, ક્લીં કીલકં, મમ શ્રીધર્માર્થકામમોક્ષાર્થે
જપે વિનિયોગઃ ।

ઋષ્યાદિન્યાસઃ -
શ્રીદક્ષિણામૂર્તિઋષયે નમઃ શિરસિ ।

પઙ્ક્તિશ્છન્દસે નમઃ મુખે ।
આદ્યા શ્રીભુવનેશ્વરીદેવતાયૈ નમઃ હૃદિ ।
હ્રીં બીજાય નમઃ ગુહ્યે ।
શ્રીં શક્તયે નમઃ નાભૌ ।
ક્લીં કીલકાય નમઃ પાદયોઃ ।
ધર્માર્થકામમોક્ષાર્થે વિનિયોગાય નમઃ સર્વાઙ્ગે ।

અથ સહસ્રનામસ્તોત્રમ્ ।
આદ્યા માયા પરા શક્તિઃ શ્રીં હ્રીં ક્લીં ભુવનેશ્વરી ।
var આદ્યા કમલા વાણી માયા શ્રીભુવનેશ્વરી
ભુવના ભાવના ભવ્યા ભવાની ભવભાવિની ॥ ૬॥ ભવમોચની

રુદ્રાણી રુદ્રભક્તા ચ તથા રુદ્રપ્રિયા સતી ।
ઉમા કાત્યાયની દુર્ગા મઙ્ગલા સર્વમઙ્ગલા ॥ ૭॥ ઉમા કામેશ્વરી

ત્રિપુરા પરમેશાની ત્રિપુરા સુન્દરી પ્રિયા ।
રમણા રમણી રામા રામકાર્યકરી શુભા ॥ ૮॥

બ્રાહ્મી નારાયણી ચણ્ડી ચામુણ્ડા મુણ્ડનાયિકા ।
માહેશ્વરી ચ કૌમારી વારાહી ચાપરાજિતા ॥ ૯॥

મહામાયા મુક્તકેશી મહાત્રિપુરસુન્દરી ।
સુન્દરી શોભના રક્તા રક્તવસ્ત્રાપિધાયિની ॥ ૧૦॥

રક્તાક્ષી રક્તવસ્ત્રા ચ રક્તબીજાતિસુન્દરી ।
રક્તચન્દનસિક્તાઙ્ગી રક્તપુષ્પસદાપ્રિયા ॥ ૧૧॥

કમલા કામિની કાન્તા કામદેવસદાપ્રિયા ।
લક્ષ્મી લોલા ચઞ્ચલાક્ષી ચઞ્ચલા ચપલા પ્રિયા ॥ ૧૨॥

ભૈરવી ભયહર્ત્રી ચ મહાભયવિનાશિની ।
ભયઙ્કરી મહાભીમા ભયહા ભયનાશિની ॥ ૧૩॥

શ્મશાને પ્રાન્તરે દુર્ગે સંસ્મૃતા ભયનાશિની ।
જયા ચ વિજયા ચૈવ જયપૂર્ણા જયપ્રદા ॥ ૧૪॥

યમુના યામુના યામ્યા યામુનજા યમપ્રિયા ।
સર્વેષાં જનિકા જન્યા જનહા જનવર્ધિની ॥ ૧૫॥

કાલી કપાલિની કુલ્લા કાલિકા કાલરાત્રિકા ।
મહાકાલહૃદિસ્થા ચ કાલભૈરવરૂપિણી ॥ ૧૬॥

કપાલખટ્વાઙ્ગધરા પાશાઙ્કુશવિધારિણી ।
અભયા ચ ભયા ચૈવ તથા ચ ભયનાશિની ॥ ૧૭॥

મહાભયપ્રદાત્રી ચ તથા ચ વરહસ્તિની ।
ગૌરી ગૌરાઙ્ગિની ગૌરા ગૌરવર્ણા જયપ્રદા ॥ ૧૮॥

ઉગ્રા ઉગ્રપ્રભા શાન્તિઃ શાન્તિદાઽશાન્તિનાશિની ।
ઉગ્રતારા તથા ચોગ્રા નીલા ચૈકજટા તથા ॥ ૧૯॥

હાં હાં હૂં હૂં તથા તારા તથા ચ સિદ્ધિકાલિકા ।
તારા નીલા ચ વાગીશી તથા નીલસરસ્વતી ॥ ૨૦॥

ગઙ્ગા કાશી સતી સત્યા સર્વતીર્થમયી તથા ।
તીર્થરૂપા તીર્થપુણ્યા તીર્થદા તીર્થસેવિકા ॥ ૨૧॥

પુણ્યદા પુણ્યરૂપા ચ પુણ્યકીર્તિપ્રકાશિની ।
પુણ્યકાલા પુણ્યસંસ્થા તથા પુણ્યજનપ્રિયા ॥ ૨૨॥

તુલસી તોતુલાસ્તોત્રા રાધિકા રાધનપ્રિયા ।
સત્યાસત્યા સત્યભામા રુક્મિણી કૃષ્ણવલ્લભા ॥ ૨૩॥

દેવકી કૃષ્ણમાતા ચ સુભદ્રા ભદ્રરૂપિણી ।
મનોહરા તથા સૌમ્યા શ્યામાઙ્ગી સમદર્શના ॥ ૨૪॥

ઘોરરૂપા ઘોરતેજા ઘોરવત્પ્રિયદર્શના ।
કુમારી બાલિકા ક્ષુદ્રા કુમારીરૂપધારિણી ॥ ૨૫॥

યુવતી યુવતીરૂપા યુવતીરસરઞ્જકા ।
પીનસ્તની ક્ષુદ્રમધ્યા પ્રૌઢા મધ્યા જરાતુરા ॥ ૨૬॥

અતિવૃદ્ધા સ્થાણુરૂપા ચલાઙ્ગી ચઞ્ચલા ચલા ।
દેવમાતા દેવરૂપા દેવકાર્યકરી શુભા ॥ ૨૭॥

દેવમાતા દિતિર્દક્ષા સર્વમાતા સનાતની ।
પાનપ્રિયા પાયની ચ પાલના પાલનપ્રિયા ॥ ૨૮॥

મત્સ્યાશી માંસભક્ષ્યા ચ સુધાશી જનવલ્લભા ।
તપસ્વિની તપી તપ્યા તપઃસિદ્ધિપ્રદાયિની ॥ ૨૯॥

હવિષ્યા ચ હવિર્ભોક્ત્રી હવ્યકવ્યનિવાસિની ।
યજુર્વેદા વશ્યકરી યજ્ઞાઙ્ગી યજ્ઞવલ્લભા ॥ ૩૦॥

દક્ષા દાક્ષાયિણી દુર્ગા દક્ષયજ્ઞવિનાશિની ।
પાર્વતી પર્વતપ્રીતા તથા પર્વતવાસિની ॥ ૩૧॥

હૈમી હર્મ્યા હેમરૂપા મેના માન્યા મનોરમા ।
કૈલાસવાસિની મુક્તા શર્વક્રીડાવિલાસિની ॥ ૩૨॥

ચાર્વઙ્ગી ચારુરૂપા ચ સુવક્ત્રા ચ શુભાનના ।
ચલત્કુણ્ડલગણ્ડશ્રીર્લસત્કુણ્ડલધારિણી ॥ ૩૩॥

મહાસિંહાસનસ્થા ચ હેમભૂષણભૂષિતા ।
હેમાઙ્ગદા હેમભૂષા ચ સૂર્યકોટિસમપ્રભા ॥ ૩૪॥

બાલાદિત્યસમાકાન્તિઃ સિન્દૂરાર્ચિતવિગ્રહા ।
યવા યાવકરૂપા ચ રક્તચન્દનરૂપધૃક્ ॥ ૩૫॥

કોટરી કોટરાક્ષી ચ નિર્લજ્જા ચ દિગમ્બરા ।
પૂતના બાલમાતા ચ શૂન્યાલયનિવાસિની ॥ ૩૬॥

શ્મશાનવાસિની શૂન્યા હૃદ્યા ચતુરવાસિની ।
મધુકૈટભહન્ત્રી ચ મહિષાસુરઘાતિની ॥ ૩૭॥

નિશુમ્ભશુમ્ભમથની ચણ્ડમુણ્ડવિનાશિની ।
શિવાખ્યા શિવરૂપા ચ શિવદૂતી શિવપ્રિયા ॥ ૩૮॥

શિવદા શિવવક્ષઃસ્થા શર્વાણી શિવકારિણી ।
ઇન્દ્રાણી ચેન્દ્રકન્યા ચ રાજકન્યા સુરપ્રિયા ॥ ૩૯॥

લજ્જાશીલા સાધુશીલા કુલસ્ત્રી કુલભૂષિકા ।
મહાકુલીના નિષ્કામા નિર્લજ્જા કુલભૂષણા ॥ ૪૦॥

કુલીના કુલકન્યા ચ તથા ચ કુલભૂષિતા ।
અનન્તાનન્તરૂપા ચ અનન્તાસુરનાશિની ॥ ૪૧॥

હસન્તી શિવસઙ્ગેન વાઞ્છિતાનન્દદાયિની ।
નાગાઙ્ગી નાગભૂષા ચ નાગહારવિધારિણી ॥ ૪૨॥

ધરિણી ધારિણી ધન્યા મહાસિદ્ધિપ્રદાયિની ।

ડાકિની શાકિની ચૈવ રાકિની હાકિની તથા ॥ ૪૩॥

ભૂતા પ્રેતા પિશાચી ચ યક્ષિણી ધનદાર્ચિતા ।
ધૃતિઃ કીર્તિઃ સ્મૃતિર્મેધા તુષ્ટિઃપુષ્ટિરુમા રુષા ॥ ૪૪॥

શાઙ્કરી શામ્ભવી મીના રતિઃ પ્રીતિઃ સ્મરાતુરા ।
અનઙ્ગમદના દેવી અનઙ્ગમદનાતુરા ॥ ૪૫॥

ભુવનેશી મહામાયા તથા ભુવનપાલિની ।
ઈશ્વરી ચેશ્વરીપ્રીતા ચન્દ્રશેખરભૂષણા ॥ ૪૬॥

ચિત્તાનન્દકરી દેવી ચિત્તસંસ્થા જનસ્ય ચ ।
અરૂપા બહુરૂપા ચ સર્વરૂપા ચિદાત્મિકા ॥ ૪૭॥

અનન્તરૂપિણી નિત્યા તથાનન્તપ્રદાયિની ।
નન્દા ચાનન્દરૂપા ચ તથાઽનન્દપ્રકાશિની ॥ ૪૮॥

સદાનન્દા સદાનિત્યા સાધકાનન્દદાયિની ।
વનિતા તરુણી ભવ્યા ભવિકા ચ વિભાવિની ॥ ૪૯॥

ચન્દ્રસૂર્યસમા દીપ્તા સૂર્યવત્પરિપાલિની ।
નારસિંહી હયગ્રીવા હિરણ્યાક્ષવિનાશિની ॥ ૫૦॥

વૈષ્ણવી વિષ્ણુભક્તા ચ શાલગ્રામનિવાસિની ।
ચતુર્ભુજા ચાષ્ટભુજા સહસ્રભુજસંજ્ઞિતા ॥ ૫૧॥

આદ્યા કાત્યાયની નિત્યા સર્વાદ્યા સર્વદાયિની ।
સર્વચન્દ્રમયી દેવી સર્વવેદમયી શુભા ॥ ૫૨॥

સવદેવમયી દેવી સર્વલોકમયી પુરા ।
સર્વસમ્મોહિની દેવી સર્વલોકવશઙ્કરી ॥ ૫૩॥

રાજિની રઞ્જિની રાગા દેહલાવણ્યરઞ્જિતા ।
નટી નટપ્રિયા ધૂર્તા તથા ધૂર્તજનાર્દિની ॥ ૫૪॥

મહામાયા મહામોહા મહાસત્ત્વવિમોહિતા ।
બલિપ્રિયા માંસરુચિર્મધુમાંસપ્રિયા સદા ॥ ૫૫॥

મધુમત્તા માધવિકા મધુમાધવરૂપિકા ।
દિવામયી રાત્રિમયી સન્ધ્યા સન્ધિસ્વરૂપિણી ॥ ૫૬॥

કાલરૂપા સૂક્ષ્મરૂપા સૂક્ષ્મિણી ચાતિસૂક્ષ્મિણી ।
તિથિરૂપા વારરૂપા તથા નક્ષત્રરૂપિણી ॥ ૫૭॥

સર્વભૂતમયી દેવી પઞ્ચભૂતનિવાસિની ।
શૂન્યાકારા શૂન્યરૂપા શૂન્યસંસ્થા ચ સ્તમ્ભિની ॥ ૫૮॥

આકાશગામિની દેવી જ્યોતિશ્ચક્રનિવાસિની ।
ગ્રહાણાં સ્થિતિરૂપા ચ રુદ્રાણી ચક્રસમ્ભવા ॥ ૫૯॥

ઋષીણાં બ્રહ્મપુત્રાણાં તપઃસિદ્ધિપ્રદાયિની ।
અરુન્ધતી ચ ગાયત્રી સાવિત્રી સત્ત્વરૂપિણી ॥ ૬૦॥

ચિતાસંસ્થા ચિતારૂપા ચિત્તસિદ્ધિપ્રદાયિની ।
શવસ્થા શવરૂપા ચ શવશત્રુનિવાસિની ॥ ૬૧॥

યોગિની યોગરૂપા ચ યોગિનાં મલહારિણી ।
સુપ્રસન્ના મહાદેવી યામુની મુક્તિદાયિની ॥ ૬૨॥

નિર્મલા વિમલા શુદ્ધા શુદ્ધસત્વા જયપ્રદા ।
મહાવિદ્યા મહામાયા મોહિની વિશ્વમોહિની ॥ ૬૩॥

કાર્યસિદ્ધિકરી દેવી સર્વકાર્યનિવાસિની ।
કાર્યકાર્યકરી રૌદ્રી મહાપ્રલયકારિણી ॥ ૬૪॥

સ્ત્રીપુંભેદાહ્યભેદ્યા ચ ભેદિની ભેદનાશિની ।
સર્વરૂપા સર્વમયી અદ્વૈતાનન્દરૂપિણી ॥ ૬૫॥

પ્રચણ્ડા ચણ્ડિકા ચણ્ડા ચણ્ડાસુરવિનાશિની ।
સુમસ્તા બહુમસ્તા ચ છિન્નમસ્તાઽસુનાશિની ॥ ૬૬॥

અરૂપા ચ વિરૂપા ચ ચિત્રરૂપા ચિદાત્મિકા ।
બહુશસ્ત્રા અશસ્ત્રા ચ સર્વશસ્ત્રપ્રહારિણી ॥ ૬૭॥

શાસ્ત્રાર્થા શાસ્ત્રવાદા ચ નાના શાસ્ત્રાર્થવાદિની ।
કાવ્યશાસ્ત્રપ્રમોદા ચ કાવ્યાલઙ્કારવાસિની ॥ ૬૮॥

રસજ્ઞા રસના જિહ્વા રસામોદા રસપ્રિયા ।
નાનાકૌતુકસંયુક્તા નાનારસવિલાસિની ॥ ૬૯॥

અરૂપા ચ સ્વરૂપા ચ વિરૂપા ચ સુરૂપિણી ।
રૂપાવસ્થા તથા જીવા વેશ્યાદ્યા વેશધારિણી ॥ ૭૦॥

નાનાવેશધરા દેવી નાનાવેશેષુ સંસ્થિતા ।
કુરૂપા કુટિલા કૃષ્ણા કૃષ્ણારૂપા ચ કાલિકા ॥ ૭૧॥

લક્ષ્મીપ્રદા મહાલક્ષ્મીઃ સર્વલક્ષણસંયુતા ।
કુબેરગૃહસંસ્થા ચ ધનરૂપા ધનપ્રદા ॥ ૭૨॥

નાનારત્નપ્રદા દેવી રત્નખણ્ડેષુ સંસ્થિતા ।
વર્ણસંસ્થા વર્ણરૂપા સર્વવર્ણમયી સદા ॥ ૭૩॥

ઓઙ્કારરૂપિણી વાચ્યા આદિત્યજ્યોતીરૂપિણી ।
સંસારમોચિની દેવી સઙ્ગ્રામે જયદાયિની ॥ ૭૪॥

જયરૂપા જયાખ્યા ચ જયિની જયદાયિની ।
માનિની માનરૂપા ચ માનભઙ્ગપ્રણાશિની ॥ ૭૫॥

માન્યા માનપ્રિયા મેધા માનિની માનદાયિની ।
સાધકાસાધકાસાધ્યા સાધિકા સાધનપ્રિયા ॥ ૭૬॥

સ્થાવરા જઙ્ગમા પ્રોક્તા ચપલા ચપલપ્રિયા ।
ઋદ્ધિદા ઋદ્ધિરૂપા ચ સિદ્ધિદા સિદ્ધિદાયિની ॥ ૭૭॥

ક્ષેમઙ્કરી શઙ્કરી ચ સર્વસમ્મોહકારિણી ।
રઞ્જિતા રઞ્જિની યા ચ સર્વવાઞ્છાપ્રદાયિની ॥ ૭૮॥

ભગલિઙ્ગપ્રમોદા ચ ભગલિઙ્ગનિવાસિની ।
ભગરૂપા ભગાભાગ્યા લિઙ્ગરૂપા ચ લિઙ્ગિની ॥ ૭૯॥

ભગગીતિર્મહાપ્રીતિર્લિઙ્ગગીતિર્મહાસુખા ।
સ્વયમ્ભૂઃ કુસુમારાધ્યા સ્વયમ્ભૂઃ કુસુમાકુલા ॥ ૮૦॥

સ્વયમ્ભૂઃ પુષ્પરૂપા ચ સ્વયમ્ભૂઃ કુસુમપ્રિયા ।
શુક્રકૂપા મહાકૂપા શુક્રાસવનિવાસિની ॥ ૮૧॥

શુક્રસ્થા શુક્રિણી શુક્રા શુક્રપૂજકપૂજિતા ।
કામાક્ષા કામરૂપા ચ યોગિની પીઠવાસિની ॥ ૮૨॥

સર્વપીઠમયી દેવી પીઠપૂજાનિવાસિની ।
અક્ષમાલાધરા દેવી પાનપાત્રવિધારિણી ॥ ૮૩॥

શૂલિની શૂલહસ્તા ચ પાશિની પાશરૂપિણી ।

ખડ્ગિની ગદિની ચૈવ તથા સર્વાસ્ત્રધારિણી ॥ ૮૪॥

ભાવ્યા ભવ્યા ભવાની સા ભવમુક્તિપ્રદાયિની ।
ચતુરા ચતુરપ્રીતા ચતુરાનનપૂજિતા ॥ ૮૫॥

દેવસ્તવ્યા દેવપૂજ્યા સર્વપૂજ્યા સુરેશ્વરી ।
જનની જનરૂપા ચ જનાનાં ચિત્તહારિણી ॥ ૮૬॥

જટિલા કેશબદ્ધા ચ સુકેશી કેશબદ્ધિકા ।
અહિંસા દ્વેષિકા દ્વેષ્યા સર્વદ્વેષવિનાશિની ॥ ૮૭॥

ઉચ્ચાટિની દ્વેષિની ચ મોહિની મધુરાક્ષરા ।
ક્રીડા ક્રીડકલેખાઙ્કુકારણાકારકારિકા ॥ ૮૮॥

સર્વજ્ઞા સર્વકાર્યા ચ સર્વભક્ષા સુરારિહા ।
સર્વરૂપા સર્વશાન્તા સર્વેષાં પ્રાણરૂપિણી ॥ ૮૯॥

સૃષ્ટિસ્થિતિકરી દેવી તથા પ્રલયકારિણી ।
મુગ્ધા સાધ્વી તથા રૌદ્રી નાનામૂર્તિવિધારિણી ॥ ૯૦॥

ઉક્તાનિ યાનિ દેવેશિ અનુક્તાનિ મહેશ્વરિ ।
યત્ કિઞ્ચિદ્ દૃશ્યતે દેવિ તત્ સર્વં ભુવનેશ્વરી ॥ ૯૧॥

ઇતિ શ્રીભુવનેશ્વર્યા નામાનિ કથિતાનિ તે ।
સહસ્રાણિ મહાદેવિ ફલં તેષાં નિગદ્યતે ॥ ૯૨॥

યઃ પઠેત્ પ્રાતરુત્થાય ચાર્દ્ધરાત્રે તથા પ્રિયે ।
પ્રાતઃકાલે તથા મધ્યે સાયાહ્ને હરવલ્લભે ॥ ૯૩॥

યત્ર તત્ર પઠિત્વા ચ ભક્ત્યા સિદ્ધિર્ન સંશયઃ ।
પઠેદ્ વા પાઠયેદ્ વાપિ શ‌ૃણુયાચ્છ્રાવયેત્તથા ॥ ૯૪॥

તસ્ય સર્વં ભવેત્ સત્યં મનસા યચ્ચ વાઞ્છિતમ્ ।
અષ્ટમ્યાં ચ ચતુર્દશ્યાં નવમ્યાં વા વિશેષતઃ ॥ ૯૫॥

સર્વમઙ્ગલસંયુક્તે સઙ્ક્રાતૌ શનિભૌમયોઃ ।
યઃ પઠેત્ પરયા ભક્ત્યા દેવ્યા નામસહસ્રકમ્ ॥ ૯૬॥

તસ્ય દેહે ચ સંસ્થાનં કુરુતે ભુવનેશ્વરી ।
તસ્ય કાર્યં ભવેદ્ દેવિ અન્યથા ન કથઞ્ચન ॥ ૯૭॥

શ્મશાને પ્રાન્તરે વાપિ શૂન્યાગારે ચતુષ્પથે ।
ચતુષ્પથે ચૈકલિઙ્ગે મેરુદેશે તથૈવ ચ ॥ ૯૮॥

જલમધ્યે વહ્નિમધ્યે સઙ્ગ્રામે ગ્રામશાન્તયે ।
જપત્વા મન્ત્રસહસ્રં તુ પઠેન્નામસહસ્રકમ્ ॥ ૯૯॥

ધૂપદીપાદિભિશ્ચૈવ બલિદાનાદિકૈસ્તથા ।
નાનાવિધૈસ્તથા દેવિ નૈવેદ્યૈર્ભુવનેશ્વરીમ્ ॥ ૧૦૦॥

સમ્પૂજ્ય વિધિવજ્જપ્ત્વા સ્તુત્વા નામસહસ્રકૈઃ ।
અચિરાત્ સિદ્ધિમાપ્નોતિ સાધકો નાત્ર સંશયઃ ॥ ૧૦૧॥

તસ્ય તુષ્ટા ભવેદ્ દેવી સર્વદા ભુવનેશ્વરી ।
ભૂર્જપત્રે સમાલિખ્ય કુઙ્કુમાદ્ રક્તચન્દનૈઃ ॥ ૧૦૨॥

તથા ગોરોચનાદ્યૈશ્ચ વિલિખ્ય સાધકોત્તમઃ ।
સુતિથૌ શુભનક્ષત્રે લિખિત્વા દક્ષિણે ભુજે ॥ ૧૦૩॥

ધારયેત્ પરયા ભક્ત્યા દેવીરૂપેણ પાર્વતિ ! ।
તસ્ય સિદ્ધિર્મહેશાનિ અચિરાચ્ચ ભવિષ્યતિ ॥ ૧૦૪॥

રણે રાજકુલે વાઽપિ સર્વત્ર વિજયી ભવેત્ ।
દેવતા વશમાયાતિ કિં પુનર્માનવાદયઃ ॥ ૧૦૫॥

વિદ્યાસ્તમ્ભં જલસ્તમ્ભં કરોત્યેવ ન સંશયઃ ।
પઠેદ્ વા પાઠયેદ્ વાઽપિ દેવીભક્ત્યા ચ પાર્વતિ ॥ ૧૦૬॥

ઇહ ભુક્ત્વા વરાન્ ભોગાન્ કૃત્વા કાવ્યાર્થવિસ્તરાન્ ।
અન્તે દેવ્યા ગણત્વં ચ સાધકો મુક્તિમાપ્નુયાત્ ॥ ૧૦૭॥

પ્રાપ્નોતિ દેવદેવેશિ સર્વાર્થાન્નાત્ર સંશયઃ ।
હીનાઙ્ગે ચાતિરિક્તાઙ્ગે શઠાય પરશિષ્યકે ॥ ૧૦૮॥

ન દાતવ્યં મહેશાનિ પ્રાણાન્તેઽપિ કદાચન ।
શિષ્યાય મતિશુદ્ધાય વિનીતાય મહેશ્વરિ ॥ ૧૦૯॥

દાતવ્યઃ સ્તવરાજશ્ચ સર્વસિદ્ધિપ્રદો ભવેત્ ।
લિખિત્વા ધારયેદ્ દેહે દુઃખં તસ્ય ન જાયતે ॥ ૧૧૦॥

ય ઇદં ભુવનેશ્વર્યાઃ સ્તવરાજં મહેશ્વરિ ।
ઇતિ તે કથિતં દેવિ ભુવનેશ્યાઃ સહસ્રકમ્ ॥ ૧૧૧॥

યસ્મૈ કસ્મૈ ન દાતવ્યં વિના શિષ્યાય પાર્વતિ ।
સુરતરુવરકાન્તં સિદ્ધિસાધ્યૈકસેવ્યં
    યદિ પઠતિ મનુષ્યો નાન્યચેતાઃ સદૈવ ।
ઇહ હિ સકલભોગાન્ પ્રાપ્ય ચાન્તે શિવાય
    વ્રજતિ પરસમીપં સર્વદા મુક્તિમન્તે ॥ ૧૧૨॥

॥ ઇતિ શ્રીરુદ્રયામલે તન્ત્રે ભુવનેશ્વરીસહસ્રનામાખ્યં
સ્તોત્રં સમ્પૂર્ણમ્ ॥ શ્રીરસ્તુ ॥

The text appears shorter for providing 1000 names.
One should chant it with devotion and not get stuck to
counting to 1000 names.

Encoded and proofread by DPD
Help from Alex

*Shri Bhuvaneshwari Sahasranamastotram*
pdf was typeset on September 17, 2023

Please send corrections to *sanskrit@cheerful.com*